# प्रातिपदिकस्वरनिर्णये फिट्सूत्राणां योगदानम्

XXXXXXX

**सारसंक्षेपः**

वेदपाठे वेदार्थबोधे च उदात्तादिस्वराणां महत्त्वम् अतीव वर्तते। स्वरविज्ञानं सौरवशास्त्रं वा पाणिनिना आविष्कृतम्। सौरवशास्त्रस्य परिचयो यद्यपि प्रातिशाख्येऽपि उपलभ्यते। तथापि पाणिनीयसूत्राणामेव स्वरसाधने प्राधान्येन उपयोगो भवति। महर्षिणा शान्तनवाचार्येण फिट्सूत्राणि प्रणीतानि। तेषां सूत्राणां व्याख्यानं भट्टोजिदीक्षितेन कृतम्। पतञ्जलिना फिट्सूत्रेषु प्रथमं सामान्येन अन्तोदात्तत्वविषये 'फिषोऽन्त उदात्तः' इति संकेतितम्। वार्त्तिककारात् कात्यायनादपि फिट्सूत्राणि पूर्ववर्त्तीनि सन्ति। फिट्सूत्राणि पाणिनेरपि पूर्ववर्त्तीनि इति आचार्यचन्द्रगोमिमतम्। फिट्सूत्राणि चतुर्षु पादेषु विभक्ताः सन्ति। निबन्धेऽस्मिन् तृतीयचतुर्थपादस्थितानां फिट्सूत्राणां सोदाहरणं व्याख्यानं तुलनात्मकमध्ययनञ्च कृतम्।

**कुञ्चिकाशब्दः**

उदात्तः, अनुदात्तः, स्वरितः, फिट्, आद्युदात्तः, उपोत्तमम्, नप् (नपुंसकम्), हय् (हल्)।

वैदिकमन्त्राणाम् अर्थावबोधे स्वरनिर्णये च फिट्सूत्राणाम् उपयोगः अतीव वर्तते। फिट्सूत्रकारः खलु शान्तनवाचार्य्यः। फिट्सूत्राणां व्याख्यानं भट्टोजिदीक्षितेन कृतम्। प्रातिपदिकं फिट्। फिट् इति पूर्वाचार्यप्रसिद्ध्या प्रातिपदिकमुच्यते। फिट्सूत्राणामपि प्रामाण्यं वर्तते। 'आद्युदात्तश्च'[१] इति पानिणीयसूत्रेण प्रत्ययस्य आद्युदात्तता विहिता। अस्य सूत्रस्य भाष्यं वर्त्तते – 'प्रातिपदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्ति' इति। एषां सूत्राणां प्रामाण्यविषये सुबोधिनीटीकायाम् उक्तम् – 'अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रीयन्ते भाष्याज्ज्ञापकात्।' फिट्सूत्रेषु तृतीयपादस्थितानां सूत्राणां सोदाहरणं विश्लेषणम् अधुना क्रियते –

५०. **अथ द्वितीयं प्रागीषात्** – 'ईषान्तस्य हयादेरादिर्वा'[२] इति सूत्रात् प्राक् 'द्वितीयम्' इति पदस्य अधिकारः वर्त्तते। अत एव अधिकारसूत्रमिदम्।

५१. **त्र्यचां प्राङ्मकरात्**। 'मकरवरूढ' इत्यतः प्राक् 'त्र्यचाम्' इति पदस्य अधिकारो वर्तते। 'मकरात्' इति पदेन 'मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा'[३] इति सूत्रस्य परामर्शो भवति। त्रयाणाम् अचां समाहारः, तेषाम्, त्र्यचाम्, द्विगुसमासः। वर्तमानसूत्रमपि अधिकारसूत्रम्।

५२. **स्वाङ्गानामकुर्वादीनाम्**। स्वस्य अङ्गम्, तेषाम्, स्वाङ्गानाम्, षष्ठीतत्पुरुषसमासः। कुश्च र् च व् च = कुर्वः। कुर्वः आदिर्येषाम्, ते, कुर्वादयः, बहुव्रीहिसमासः। न कुर्वादयः, तेषाम्, अकुर्वादीनाम्, नञ्तत्पुरुषसमासः। कवगरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयम् उदात्तं भवति। यथा – <u>ल</u>लाट<u>म्</u>। 'लघावन्ते द्वयोश्च बह्वषो गुरुः'[४] इति सूत्रेण टकारोत्तरवर्त्तिनः अकारस्य उदात्ते प्राप्ते 'स्वाङ्गानामकुर्वादीनाम्'[५] इति वर्तमानफिट्सूत्रेण आकारस्य उदात्तो भवति। कुर्वादीनां तु न भवति। यथा – <u>क</u>पोलः॑। 'लघावन्ते द्वयोश्च बह्वषो गुरुः'[६] इति फिट्सूत्रेण गुरुवर्णस्य ओकारस्य उदात्तो भवति। किन्तु वर्तमानफिट्सूत्रेण नोदात्तः। अत्र नागेशेनोक्तम् – 'यद्यप्यत्र लघावन्ते.....' इति मध्योदात्तत्वमेवेष्टं तथाप्युदाहरणदिग् बोध्या।' अपरम् उदाहरणं तावत् – रसना। अत्र

‘स्वाङ्गशिटामदन्तानाम्’[७] इति फिट्सूत्रेण स्वाङ्गवाची रसनाशब्दः आद्युदात्तो भवति । ‘वदनम्’ इत्यत्रापि स्वाङ्गवाचि ‘वदनम्’ इति पदम् आद्युदात्तत्वं भवति ।

५३. **मादीनां च** । म आदिर्येषाम्, तेषाम्, मादीनाम्, बहुव्रीहिसमासः । सूत्रस्य अर्थः एवं भवति – मकारादीनां त्र्यचां द्वितीयो अच् उदात्तो भवति । यथा – मलयः । अत्र ‘मादीनां च’ इति वर्तमानफिट्सूत्रेण द्वितीयाचः उदात्तत्वं भवति । अपरम् उदाहरणं तावत् – मकरः । इत्यत्रापि ‘मादीनां च’ इति फिट्सूत्रेण ककारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति । मलयपदे ‘मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा’[८] इति फिट्सूत्रेण यान्तस्यान्त्यात्पूर्वमित्यस्य अस्य वा प्रवृत्तौ फले न विशेषः इत्युदाहृतम् । सुबोधिन्यां वर्तते – ‘अनयोर्मकरवरुडेति यान्तस्यान्त्यात्पूर्वमिति विशिष्य स्वरविधानान्महेन्द्र इत्युदाहर्तव्यम् ।’

५४. **शादीनां शाकानाम्** । शः आदिर्येषाम्, तेषाम्, शाकादीनाम्, बहुव्रीहिसमासः । शाकानाम् = शाकवाचिनाम् । अस्मिन् सूत्रे ‘अथ द्वितीयं प्रागीषात्’[९] इति सूत्रात् ‘द्वितीयम्’ इति पदम्, ‘त्र्यचां प्राङ्मकारात्’[१०] इति सूत्रात् ‘त्र्यचाम्’ इति पदं च अत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति – शकारादीनां शाकवाचकानां त्र्यचां द्वितीयम् उदात्तं भवति । केचित्तं सादीनाम् इति पठित्वा सर्षपा इति उदाहरन्ति । सूत्रस्य उदाहरणं तावत् - शीतन्या । अत्र शकारादित्वात् तकारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति । अपरम् उदाहरणं तावत् – शतपुष्पा । अत्रापि शकारादित्वात् शाकवाचकत्वाच्च तकारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति ।

५५. **पान्तानां गुर्वादीनाम्** । पः अन्ते येषाम्, तेषाम्, पान्तानाम्, बहुव्रीहिसमासः । गुरुः आदिर्येषाम्, तेषाम्, गुर्वादीनाम्, बहुव्रीहिसमासः । तत्रापि ‘अथ द्वितीयं प्रागीषात्’[११] इति सूत्रात् ‘द्वितीयम्’ इति पदम्, ‘त्र्यचां प्राङ्मकरात्’[१२] इति सूत्रात् ‘त्र्यचाम्’ इति पदञ्च अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति प-शब्दान्तानां गुर्वादीनां त्र्यचां द्वितीयम् उदात्तं भवति । सूत्रस्य उदाहरणं तावत् – पादपः । अत्र ‘पान्तानां गुर्वादीनाम्’[१३] इति फिट्सूत्रेण पान्तत्वाद् गुर्वादित्वाच्च द्वितीयाचः दकारोत्तरवर्त्तिनः अकारस्य उदात्तं भवति । अपरम् उदाहरणं तावत् – आतपः । अत्रापि तकारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति । ‘अनूपः’ इत्यत्र ‘अनोप्रधानकनीयसी’[१४] इति सूत्रेण अन्तोदात्तत्वम् । नीपः इत्यत्र तु ‘णेरनिधाने’[१५] इति सूत्रेण अन्तोदात्तत्वं भवति । सूत्रे ‘पान्तानाम्’ इति पदग्रहणं किमर्थम् ? इति जिज्ञासायाम् उच्यते ‘गर्दभः’ इत्यत्र ‘लघावन्ते द्वयोश्च बह्वषो गुरुः’[१६] इति फिट्सूत्रेण मध्योदात्तो भवति । ‘न गर्दभः पुरः’ इत्यत्र अन्तोदात्तत्वञ्च छान्दसम् । सूत्रे ‘गुर्वादीनाम्’ इति पदग्रहणं किमर्थम् इति जिज्ञासायामुच्यते – ‘कुणपः’ । अत्र गुर्वादित्वाभावात् न मध्योदात्ततम् । अत्र ‘क्वणेः सम्प्रसारणञ्च’[१७] इति सूत्रेण कपन् । लघ्वादीनाम् उदाहरणं – अनूपम् । द्व्यचाम् उदाहरणं तावत् – नीपम् ।

५६. **युतान्यण्यन्तानाम्** । युतश्च अनिश्च अणिश्च, युतान्यणयः, द्वन्द्वसमासः, युतान्यणयः अन्ते येषाम्, तेषाम्, युतान्यण्यन्तानाम्, बहुव्रीहिसमासः । अत्र ‘द्वितीयम्’ इति पदम्, त्र्यचाम् इति पदञ्च अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति – युत, अनि, अणि - एतदन्तानां त्र्यचां द्वितीयम् उदात्तं भवति । सूत्रस्य उदाहरणं तावत् - अयुतम् । न युतम् = अयुतम्, दशसहस्रसंख्या । ‘अयुतम्’ – इत्यत्र ‘तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय-द्वितीयाकृत्याः’[१८] इति सूत्रेण अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते ‘युतान्यण्यन्तानाम्’ इति वर्तमानफिट्सूत्रेण द्वितीयाचः (उकारस्य) उदात्तं भवति । न च ‘समासस्य’[१९] इति सूत्रेण अन्तोदात्तत्वम् । युतान्यस्य उदाहरणमिदम् । अन्यन्तस्य उदाहरणं यथा – धमनिः । अत्र ‘युतान्यण्यन्तानाम्’[२०] इति फिट्सूत्रेण मकारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति ।

अण्यन्तस्य उदाहरणं तावत् – विपणिः । अत्र 'युतान्यण्यन्तानाम्' इति फिट्सूत्रेण पकारोत्तरवर्त्तिनः अकारस्य उदात्तत्वं भवति ।

५७. **मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा** । 'मकरश्च वरूढश्च पारेवतश्च वितस्तश्च इक्षुश्च आर्जिश्च द्राक्षा च कला च उमा च काष्ठा च पेष्ठा च काशी च, मकर-वरूढ़-पारेवत-वितस्ते-क्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काश्यः, इतरेतरयोगद्वन्द्वसमासः । मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काश्यः आदौ येषाम्, तेषाम्, मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठा-काशीनाम्, बहुव्रीहिसमासः । एषां शब्दानाम् आदिर्द्वितीयो वा उदात्तो भवति । यथा – मकरः, वरूढ़ इत्यादि । अत्र 'अथ द्वितीयं प्रागीषात्' इति सूत्रात् 'द्वितीयम्' इति पदमत्र अनुवर्तते । अत एव 'मकर' इत्यत्र मघटकस्य अकारस्य विकल्पेन उदात्तो भवति । अस्य अभावपक्षे कघटकस्य अकारस्य विकल्पेन उदात्तो भवति । एवं 'वरूढा'दिशब्दानां भवति ।

५८. **छन्दसि च** – अस्य अर्थः एवं भवति - मकरादिभिन्नशब्दानामपि वेदे आदिवर्णस्य द्वितीयवर्णस्य अपि उदात्तो भवति । अत एव दीक्षितेनोक्तम् – 'अमकराद्यर्थः आरम्भः । वेदे लक्ष्यानुसारादिः द्वितीयं च उदात्तं ज्ञेयम् । अर्थात् मकरादिभिन्नशब्दानां वेदे आदिभूतस्य अचः द्वितीयस्य अचश्च उदात्तो भवति ।

५९. **कर्दमादीनां च** – कर्दमः आदिः येषाम्, तेषाम्, कर्दमादीनाम्, बहुव्रीहिसमासः । कर्दमादिशब्दानाम् आदेरचो द्वितीयो वा उदात्तं भवति । अत्रापि 'अथ द्वितीयं प्रागीषात्' इति सूत्रात् 'द्वितीयम्' इति पदम्, 'मकरवरुढपारेवतवितस्ते-क्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा' इति सूत्रात् 'आदिः' 'वा' च इति पदद्वयमत्र अनुवर्तते । यथा - कर्दमा, कुलटा । कर्दमादिराकृतिगणः । अत्रापि पर्यायेण उदात्तो भवति ।

६०. **सुगन्धितेजनस्य ते वा** । 'अथ द्वितीयं प्रागीषात्'[२१] इति सूत्रात् द्वितीयम् इति पदम्, 'मकरवरूढपारेवतवितस्ते-क्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा'[२२] इति सूत्रात् आदिः इति पदञ्च अत्र अनुवर्तते । अत एव वर्तमानसूत्रस्य अर्थः एवं भवति – 'सुगन्धितेजन' शब्दस्य आदेः द्वितीयस्य 'ते' इत्यस्य च त्रयः पर्यायेण उदात्तो भवति । उदाहरणं यथा – सुगन्धितेजनाः । अत्र सुघटकस्य उकारस्य, 'ग'घटकस्य अकारस्य, 'ते'घटकस्य एकारस्य च पर्यायेण उदात्तो भवति ।

६१. **नपः फलान्तानाम्** । फलम् अन्ते यस्य, तेषाम्, फलान्तानाम्, बहुव्रीहिसमासः । नप् = नपुंसकम् । 'अथ द्वितीयं प्रागीषात्'[२३] इति सूत्रात् 'द्वितीयम्' इति पदम्, 'मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठा-काशीनामादिर्वा'[२४] इति सूत्रात् आदिः इति पदञ्च अत्र अनुवर्तते । अत एव सूत्रस्य अर्थ एवं भवति – 'नपुंसकस्य फलशब्दान्तस्य आदिर्द्वितीयो वा उदात्तः पर्यायेण भवति । यथा – राजादनफलम् । अनेन फिट्सूत्रेण 'फ'घटकस्य अकारस्य, 'ल'घटसस्य अकारस्य च पर्यायेण उदात्तो भवति । 'राजादनफलम्' इति सामासिकपदम् । अत्र फलशब्दः नपुंसकलिङ्गं वर्त्तते । केचित्तु 'ले फो नपः' इति अस्य स्थाने पठन्ति । नव् इति नपुंसकम् । लशब्दे परे क्लीबस्य फशब्दः उदात्तो भवति । द्वितीयोऽपि उदात्तो भवति । एवंरूपेण नागेशेन व्याख्यातम् ।

६२. **यान्तस्यान्त्यात्पूर्वम्** । यः अन्ते यस्य सः यान्तः, तस्य यान्तस्य, बहुव्रीहिसमासः । 'फिषोऽन्त उदात्तः'[२५] इति सूत्रात् 'उदात्तः' इति पदम् अत्र अनुवर्त्तते । अत एव सूत्रस्य अर्थः एवं भवति – यशब्दान्तस्य अन्त्यात् पूर्वम् उदात्तं भवति । यथा – कुलायः । अत्र 'यान्तस्यान्त्यात् पूर्वम्' इति वर्तमानफिट्सूत्रेण यान्तत्वाद् अन्त्यात् पूर्वस्य उदात्तत्वं

भवति । अत एव 'कुलाय' इत्यत्र 'ला'घटकस्य आकारस्य उदात्तो भवति । 'लघावन्ते' इत्यस्य प्रवृत्तावपि न कश्चिद् विशेषः । गवयमलयौ अत्र उदाहर्यौ । कुवलयार्थं सूत्रे अन्त्यात् पूर्वग्रहणम् ।

६३. **थान्तस्य च नालघुनी** । थः अन्ते यस्य सः, थान्तः, तस्य, थान्तस्य, बहुव्रीहिसमासः । न लघु, अलघु, नञ्तत्पुरुषसमासः । ना च अलघु च नालघुनी, द्वन्द्वसमासः । 'यान्तस्यान्त्यात्पूर्वम्'[२६] इति फिट्सूत्रात् 'अन्त्यात्', 'पूर्वम्' च इति पदद्वयम्, 'फिषोऽन्त उदात्तः' इति सूत्रात् 'उदात्तः' इति पदञ्च अत्र अनुवर्त्तते । अत एव अस्य सूत्रस्यार्थ एवं भवति – थान्तस्य 'ना'शब्दस्य, अलघुनश्च अन्त्यात् पूर्वम् उदात्ते स्तः । केचित्तु 'आन्तस्य च नालघुनी' इति पठित्वा आकारान्तस्य नाशब्दस्य च लघुनी अन्त्यात् पूर्वम् उदात्ते स्तः । यथा - नाना, दिवा, मुधा । 'आन्तस्य' इत्यस्य अर्थः आकारान्तस्य । क्वचित्तु 'थान्तस्य' इत्यपि पाठः । थाशब्दान्तस्य इत्यर्थः । केचित्तु तन्त्रेण 'थ'शब्दोऽपि गृह्यते, तेन 'सनाथो देवदत्तः' इति सिद्धम् । दीक्षितेन सूत्रस्य उदाहरणं प्रदत्तम् – सनाथा सभा ।

६४. **शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूवसां च** । शिशुमारश्च उदुम्बरश्च बलीवर्दश्च, उष्ट्रारश्च, पुरूरवाश्च, तेषाम्, शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूवसाम्, द्वन्द्वसमासः । 'फिषोऽन्त उदात्तः'[२७] इति सूत्रात् 'उदात्तः' इति पदम्, 'यान्तस्यान्त्यात् पूर्वम्'[२८] इति सूत्रात् 'अन्त्यात्' 'पूर्वम्' इति पदद्वयम् 'अथ द्वितीयं प्रागीषात्'[२९] इति फिट्सूत्रात् 'द्वितीयम्' इति पदञ्च अत्र अनुवर्तते । अस्य सूत्रस्य अर्थः एवं भवति – शिशुमार, उदुम्बर, बलीवर्द, उष्ट्रार, पुरूरवस्, एतेषाम् अन्त्यात् पूर्वं द्वितीयञ्च विकल्पेन उदात्तो भवति । 'शिशुमार' इत्यत्र 'शिंशुमार' इति पाठान्तरम् । 'उष्ट्रार' इत्यत्र उष्टार इति पाठान्तरम् । सूत्रे चकारेण 'अन्त्यात् पूर्वम्' इत्यस्य परामर्शो भवति, स च द्वितीयम् इति च सम्बध्यते ।

६५. **सांकाश्य-काम्पिल्य-नासिक्य-दार्वाघाटानाम्** । सांकाश्यञ्च, काम्पिल्यञ्च, नासिक्यञ्च, दार्वाघाटश्च, तेषाम्, सांकाश्य-काम्पिल्य-नासिक्य-दार्वाघाटानाम्, द्वन्द्वसमासः । 'फिषोऽन्त उदात्तः' इति फिट्सूत्रात् उदात्त इति पदम्, 'अथ द्वितीयं प्रागीषात्'[३०] इति सूत्रात् द्वितीयम् इति पदम्, 'सुगन्धितेजनस्य ते वा'[३१] इति फिट्सूत्रात् वा इति पदञ्च अत्र अनुवर्त्तते । अत एव सूत्रस्य अर्थ एवं भवति सांकाश्य-काम्पिल्य-नासिक्य-दार्वाघाट-इत्येतेषां शब्दानां द्वितीयम् उदात्तं वा भवति । अत्र सूत्रे मण्डूकप्लुत्या 'आदिर्वा' इति वर्तते । अत एव 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु'[३२] इति सूत्रे 'राजन्य-साङ्काश्य-काम्पिल्य-नासिक्य-दार्वाघटानामादिर्वाऽन्तो वा' इति कैयटेन उक्तम् । अत्र अन्तशब्देन आदेरपेक्षया अन्तो = द्वितीय एव, अतो न विरोधः । एवं 'सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्'[३३] इति सूत्रे 'एषामन्तः पूर्वं वा' इति काशिकायामपि पूर्वपदेन आदिः तदपेक्षया अन्तश्च अन्तशब्देन गृह्यते इति बोध्यम् । अत एव 'अन्त्यात् पूर्वमिति तु नानुवर्तते, साङ्काश्यादीनां त्रयाणां ग्रहणस्य वैयर्थ्यापत्तेः । यान्तस्यान्त्यादित्येव सिद्धेः । उत्तरसूत्रे 'आदिर्वा' इति तु स्पष्टार्थम् ।

६६. **ईषान्तस्य हयादेरादिर्वा** । ईषा अन्ते यस्य, तस्य, ईषान्तस्य, बहुव्रीहिसमासः । हय् (हल्) आदिर्यस्य, तस्य हयादेः बहुव्रीहिसमासः । हय् इति हलां संज्ञा । ईषान्तस्य हलादिशब्दस्य आदिः विकल्पेन उदात्तो भवति । यथा - हलीषा । लाङ्गलीषा ।

६७. **उशीर-दाशेर-कपाल-पलाल-शैवाल-श्यामाक-शारीर-शराव-हृदय-हिरण्यारण्यापत्यदेवराणाम्** । उशीरश्च, दाशेरश्च, कपालश्च, पलालश्च, शैवालश्च, श्यामाकश्च, शारीरञ्च, शरावश्च, हृदयञ्च, हिरण्यञ्च, अरण्यञ्च, अपत्यञ्च, देवरश्च, तेषाम्, उशीर-दाशेर-कपाल-पलाल-शैवाल-श्यामाक-शारीर-हृदय-हिरण्यारण्यापत्य-देवराणाम्,

द्वन्द्वसमासः । 'फिषोऽन्त उदात्तः'[34] इति फिट्सूत्रात् 'उदात्तः' इति पदम्, 'ईषान्तस्य हयादेरादिर्वा'[35] इति फिट्सूत्रात् 'आदिः' इति पदञ्च अत्र अनुवर्तते । अत एव सूत्रस्यार्थः एवं भवति - उशीर, दाशेर, कपाल, पलाल, शैवाल, श्यामाक, शारीर, शराव, हृदय, हिरण्य, अरण्य, अपत्य, देवर-इत्येतेषाम् आदिः उदात्तो भवति । श्यामाकपदग्रहणं चिन्त्यम्, 'धान्यानां च वृद्धक्षान्तानाम्'[36] इत्यनेनैव सिद्धत्वात् । इदमेव ज्ञापयितुं मूले दीक्षितेन - धान्यानाम् इत्यत्र 'श्यामाक' इत्युदाहृतम् । देवरग्रहणमपि चिन्त्यम्, 'लघावन्ते द्वयोश्च बह्वषो गुरुः'[37] इत्यनेनैव सिद्धत्वात् । हृदयपदग्रहणं 'स्वाङ्गानामकुर्वादीनाम्' इति द्वितीयस्य उदात्तत्वं बाधितुम् अन्येषां 'लघावन्ते द्वयोश्च बह्वषो गुरुः' इति प्राप्ते वर्तमानफिट्सूत्रम् । केचित्तु घृतादिषु देवरशब्दः पठ्यते, एवञ्च पक्षे आद्युदात्तार्थं ग्रहणम् । अत्र वा इति अत्र नानुवर्तते इति केचित् इति नागेशस्य आशयः ।

६८. **महिष्यषाढयोर्जायेष्टकाख्या चेत्** । महिषी च अषाढा च, तयोः महिष्याढ़योः, द्वन्द्वसमासः । जाया च इष्टका च जायेष्टके, द्वन्द्वसमासः । जायेष्टके आख्ये यस्याः सा, जायेष्टकाख्या, बहुव्रीहिसमासः । 'फिषोऽन्त उदात्तः' इति फिट्सूत्रात् 'उदात्तः' इति पदम् 'ईषान्तस्य हयादेरादिर्वा'[38] इति फिट्सूत्रात् आदिः इति पदमत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति - महिषीशब्दस्य अषाढा-शब्दस्य च आदिरुदात्तो भवति यथाक्रमं जायाख्यायाम् इष्टकाख्यायाञ्च । यथा - महिषी जाया । अषाढा उपदधाति । सूत्रे 'म' इत्यादि किम् ? सिंही असि, अत्र सूत्रस्य प्रवृत्तिर्यथा न स्यात्तदर्थम् । सूत्रे 'ज' इति किम् ? महिषी, अषाढ़ा नक्षत्रम् इत्यत्र सूत्रस्य प्रवृत्तिर्यथा न स्यात् । अधुना फिट्सूत्रेषु चतुर्थपादस्थितानां सूत्राणां सोदाहरणं विश्लेषणम् क्रियते –

६९. **शकटि-शकट्योरक्षरमक्षरं पर्यायेण** । शकटिश्च शकटी च, तयोः शकटि-शकट्योः, द्वन्द्वसमासः । 'फिषोऽन्त उदात्तः'[39] इति फिट्सूत्रात् 'उदात्तः' इति पदम् अत्र अनुवर्त्तते । शकटिशकटीशब्दयोः अक्षरमक्षरम् अर्थात् प्रत्येकाक्षरं पर्यायेण उदात्तो भवति । यथा - शकटिः । शकटी । 'उभे वनस्पत्यादिषु युगपत्'[40] इति सूत्रस्थयुगपत्पदग्रहणबोधितानेकोदात्तानां युगपन्न समावेश इत्यर्थानुवादकं पदं पर्यायेण इति । तत्फलन्तु 'अनुदात्तं पदमेकवर्जम्'[41] इति सूत्रम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषायाः अर्थानुवादकं शकटी इति पदग्रहणम् ।

तदुक्तं भाट्टचिन्तामणौ- *वस्तुतः सिद्धसुखविषयकप्रवृत्त्यभावात् असिद्धसुखज्ञानार्थम् अरण्यस्थदण्डादौ प्रवृत्तिजनकघटहेतुताग्रहार्थं शक्तिग्रहार्थं च सामान्यलक्षणा आवश्यकीति* इति ।

तदुक्तं भाट्टचिन्तामणौ-

> वस्तुतः सिद्धसुखविषयकप्रवृत्त्यभावात् असिद्धसुखज्ञानार्थम् अरण्यस्थदण्डादौ प्रवृत्तिजनकघटहेतुताग्रहार्थं शक्तिग्रहार्थं च सामान्यलक्षणा आवश्यकीति इति ।

ते चोपायाः वृद्धैरेवं परिगणिताः-

> शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
> वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

> शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
> वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति ।

७०. **गोष्ठजस्य ब्राह्मणनामधेयस्य** । ब्राह्मणः नामधेयः यस्य सः, ब्राह्मणनामधेयः, तस्य, ब्राह्मणनामधेयस्य, बहुव्रीहिसमासः । 'फिषोऽन्त उदात्तः'[४२] इति फिट्सूत्रात् उदात्त इति पदम्, 'शकटिशकट्योरक्षरमक्षरं पर्यायेण'[४३] इति फिट्सूत्रात् 'अक्षरम्', 'अक्षरम्' इति पदद्वयञ्च अत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति – ब्राह्मणवाचकस्य गोष्ठजशब्दस्य अक्षरमक्षरं पर्यायेण उदात्तं भवति । यथा – गोष्ठजो ब्राह्मणः । ब्राह्मणवाचकरुपार्थाभावे अस्य सूत्रस्य प्रवृत्तिर्न भवति । यथा – गोष्ठजः पशुः । अत्र 'गतिकारकोपपदात् कृत्'[४४] इति सूत्रेण कृदुत्तरप्रकृतिस्वरेणान्तोदात्तो भवति ।

७१. **पारावतस्योपोत्तमवर्जम्** । उत्तमस्य समीपम्, उपोत्तमम्, अव्ययीभावसमासः । उपोत्तमेन वर्जम्, उपोत्तमवर्जम्, तत्पुरुषसमासः । 'फिषोऽन्त उदात्तः'[४५] इति फिट्सूत्रात् उदात्त इति पदम्, 'शकटिशकट्योरक्षरमक्षरम् पर्यायेण'[४६] इति फिट्सूत्रात् 'पर्यायेण' इति पदञ्च अत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति –पारावतशब्दस्य अन्तसमीपभिन्नाच् पर्यायेण उदात्तो भवति । दीक्षितेनोक्तम् – 'शेषं क्रमेणोदात्तम्' । यथा - पारावतः । अत्र 'व'शब्दो न उदात्तः ।

७२. **धूम्रजानु-मुञ्जकेश-कालवाल-स्थालीपाकानामधूजलस्थानाम्** । धूम्रजानुश्च, मुञ्जकेशश्च, कालवालश्च, स्थालीपाकश्च, तेषाम्, धूम्रजानु-मुञ्जकेश-कालवाल-स्थालीपाकानाम्, द्वन्द्वसमासः । धूश्च, जश्च, लश्च, स्थश्च, धू-ज-ल-स्थाः, द्वन्द्वसमासः, न धू-ज-ल-स्थाः, अधू-ज-ल-स्थाः, तेषाम्, अधू-ज-ल-स्थानाम्, नञ्तत्पुरुषसमासः । 'फिषोऽन्त उदात्तः' इति फिट्सूत्रात् 'उदात्तः' इति पदम्, 'शकटि-शकट्योरक्षरमक्षरं पर्यायेण'[४७] इति फिट्सूत्रात् 'पर्यायेण' इति पदञ्च अत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति – धूम्रजानु, मुञ्जकेश, कालबाल, स्थालीपाक एषां चतुर्णां धू, ज, ल, स्थ, एतच्चतुरः वर्जयित्वा अवशिष्टानि क्रमेण उदात्तानि भवन्ति । यथा - धूम्रजानुः । मुञ्जकेशः । कालबालः । स्थालीपाकः । धूम्रजानु इत्यत्र धूशब्दं वर्जयित्वा शिष्टानां क्रमेण उदात्तत्वं भवति । मुञ्जकेश इत्यत्र जं वर्जयित्वा शिष्टानां क्रमेण उदात्तत्वं भवति । कालबाल इत्यत्र लं वर्जयित्वा शिष्टानां क्रमेण उदात्तत्वं भवति । स्थालीपाक इत्यत्र स्थं वर्जयित्वा शिष्टानां क्रमेण उदात्तत्वं भवति ।

७३. **कपिकेश-हरिकेशयोश्छन्दसि** । कपिकेशश्च, हरिकेशश्च, तयोः, कपिकेश-हरिकेशयोः, द्वन्द्वसमासः । 'फिषोऽन्त उदात्तः' इति फिट्सूत्रात् उदात्त इति पदम्, 'शकटि-शकट्योरक्षरमक्षरं पर्यायेण'[४८] इति फिट्सूत्रात् 'अक्षरम्', 'अक्षरम्', 'पर्यायेण' च इति पदत्रयम् अत्र अनुवर्तते । अत एव सूत्रस्य अर्थः एवं भवति – वेदे कपिकेश-हरिकेशशब्दयोः अक्षरमक्षरं पर्यायेण उदात्तो भवति । यथा – कपिकेशः । हरिकेशः ।

७४. **न्यङ्स्वरौ स्वरितौ** । न्यङ् च स्वश्च, न्यङ्स्वरौ, द्वन्द्वसमासः । 'न्यङ्' इत्यस्य 'स्वर्' इत्यस्य च स्वरितो भवति इति सूत्रस्यार्थः । यथा - न्यंङ्ङुत्तानः । व्यंचक्षयुत्स्वः । 'न्यङ्ङुत्तानः' इत्यत्र वर्तमानफिट्सूत्रेण 'न्यङ्' इत्यस्य स्वरितत्वं भवति । 'व्यचक्षयत्स्वः' इत्यत्र वर्तमानफिट्सूत्रेण स्वरित्यस्य स्वरितत्वं भवति ।

७५. **न्यर्वुदव्यल्कशयोरादिः** । न्यर्वुदश्च व्यल्कशश्च, तयोः, न्यर्वुद-व्यल्कशयोः, द्वन्द्वसमासः । 'न्यङ्स्वरौ स्वरितौ'[४७] इति फिट्सूत्रात् 'स्वरितौ' इति पदम् अत्र अनुवर्तते । सूत्रस्य अर्थः एवं भवति – न्यर्वुदशब्दस्य, व्यल्पशशब्दस्य च आदिः स्वरितो भवति ।

७६. **तिल्य-शिक्य-काश्मर्य-धान्य-कन्या-राजन्य-मनुष्याणामन्तः** । तिल्यश्च, शिक्यश्च, काश्मर्यश्च, धान्यञ्च, कन्या च, राजन्यश्च, मनुष्यश्च, तिल्य-शिक्य-काश्मर्य-धान्य-कन्या-राजन्य-मनुष्याः, तेषाम्, तिल्य-शिक्य-काश्मर्य-

धान्य-कन्या-राजन्य-मनुष्याणाम्, द्वन्द्वसमासः । 'न्यङ्स्वरौ स्वरितौ'[५०] इति फिट्सूत्रात् 'स्वरितौ' इति पदम् अत्र अनुवर्तते। अत एव सूत्रस्य अर्थः एवं भवति - तिल्य, शिक्य, काश्मर्य, धान्य, कन्या, राजन्य, मनुष्य एतेषां शब्दानाम् अन्तः स्वरितो भवति। 'यतोऽनावः'[५१] इति सूत्रेण आद्युदात्ते प्राप्ते तं बाधित्वा वर्तमानफिट्सूत्रेण अन्तः स्वरितो भवति। यथा - तिल्यम्। तिलानां भवनं क्षेत्रं तिल्यम्।

७७. **बिल्व-भक्ष्य-वीर्याणि छन्दसि** । बिल्वञ्च, भक्ष्यञ्च, वीर्यञ्च, बिल्व-भक्ष्य-वीर्याणि, द्वन्द्वसमासः । 'न्यङ्स्वरौ स्वरितौ'[५२] इति फिट्सूत्रात् 'स्वरितौ' इति पदम्, 'तिल्य-शिक्य-काश्मर्य-धान्य-कन्या-राजन्य-मनुष्याणामन्तः'[५३] इति फिट्सूतात् 'अन्तः' इति पदञ्च अत्र अनुवर्तते। अत एव सूत्रस्य अर्थः एवं भवति - वेदे बिल्व, भक्ष्य, वीर्य एषां शब्दानाम् अन्तः स्वरितो भवति । ननो बिल्वस्य उदतिष्ठत् । अत्र बिल्वशब्दस्य वर्तमानफिट्सूत्रेण अन्तस्वरितत्वं भवति।

७८. **त्वत्त्वसमसिमेत्यनुच्चानि**। त्वत् च, त्वश्च, समश्च, सिमश्च, त्वत्त्व-सम-सिमाः, द्वन्द्वसमासः। अनुच्चानि = न उच्चानि, नञ्तत्पुरुषसमासः, 'उच्चैरुदात्तः'[५४] इति उदात्तः । अनुच्चानि = अनुदात्तानि । 'तिल्य-शिक्य-काश्मर्य-धान्य-कन्या-राजन्य-मनुष्याणामन्तः'[५५] इति फिट्सूतात् 'अन्तः' इति पदम् अत्र अनुवर्तते ।अत एव सूत्रस्य अर्थः एवं भवति – त्वत्, त्व, सम, सिम-एषां शब्दानाम् अन्तः उदात्तो भवति। यथा – स्तरीरुत्वत्। उत त्वः पश्यन्। नभन्तामन्यके समे। सिमस्मै। जयकृष्णेन उक्तम् – 'त्वत्' इत्यादीनि सर्वानुदात्तानि भवन्ति। सिमशब्दस्य अथर्ववेदे उदात्तः। नागेशेनापि 'अनुच्चानि' इत्यस्य अर्थः एवमुक्तम् - 'सर्वानुदात्तानि'। अत्र सूत्रे 'छन्दसि' इति न अनुवर्तते, 'आद्युदात्तश्च'[५६] इति सूत्रस्थभाष्यप्रामाण्यात् । 'उत त्व पश्यन्' इत्यत्र 'त्व' इत्यत्र वर्तमानफिट्सूत्रेण अनुदात्तत्वं भवति।

७९. **सिमस्याथर्वणेऽन्त उदात्तः**। सूत्रस्य अर्थः एवं भवति - अथर्ववेदे 'सिम' इत्यस्य अन्तः उदात्तो भवति। सूत्रे अथर्वण इति प्रायिकम्। अत्र प्रायिककथनेन अन्यस्मिन् वेदेऽपि प्रयुक्तस्य सिमशब्दस्य अपि अन्त उदात्तो भवति, यदि तत्र इष्टं भवति।

८०. **निपाता आद्युदात्ताः** – निपातसंज्ञकशब्दाः आद्युदात्ता भवन्ति। 'प्रागीश्वरान्निपाताः'[५७] इति सूत्राद् आरभ्य 'अधिरीश्वरे'[५८] इति सूत्रात् प्राक् निपातसंज्ञा विधीयते। उदाहरणं यथा – स्वाहा, स्वधा। 'स्वाहा' इत्यत्र निपातत्वात् वर्तमानफिट्सूत्रेण आद्युदात्तत्वं भवति।

८१. **उपसर्गाश्चाभिवर्जम्** । अभेः वर्जम्, अभिवर्जम्, षष्ठीतत्पुरुषसमासः । अभिशब्दं वर्जयित्वा उपसर्गा आद्युदात्ता भवन्ति। सूत्रे 'अभिवर्जम्' इति पदग्रहणं किमर्थम्, तत्र उच्यते – अभ्यभिहि , अभिराममस्थात्। अत्र यथा आद्युदात्तो न स्यात्, तदर्थम्। इदं सूत्रं व्यर्थम्, उपसर्गाणां निपातत्वेनैव सिद्धेः कर्मप्रवचनीयानां तदभावज्ञापनाय इदं निपातपदग्रहणम् इति न च वाच्यम्, तेषामपि आद्युदात्तत्वस्य इष्टत्वात्। 'अभिश्चैवमादिषु पाठ्यः' इति बहवः वदन्ति। अत एव 'मानो मर्त्ता अभिद्रुहन्' इति मन्त्रे 'एवमादीनामन्तः' इति वेदभाष्यकारैः उक्तम्। उपसर्गसंज्ञासूत्रस्य भाष्येऽपि प्रपञ्चितम् । केचिद् वदन्ति उपसर्गस्यैव अभेः आद्युदात्तत्वनिषेधो यथा स्यात्। कर्मप्रवचनीयस्य तु निपातत्वाद् भवत्येव इत्येतदर्थम् इदं सूत्रम्।

८२. **एवादीनामन्तः**। एव (एवम् वा) आदिर्येषाम्, तेषाम्, एवादीनाम्, बहुव्रीहिसमासः। 'निपाताः आद्युदात्ताः'[५९] इति फिट्सूत्रात् उदाताः इति पदमत्र अनुवर्तते। एवमादीनामिति पाठान्तरम्। एवादिशब्दानाम् एवमादिशब्दानां वा

अन्तः उदात्तो भवति। यथा – एव, एवम्, नूनम्। सह ते पुत्र सूरिभिः। 'सहस्य सः'[६०] इति प्रकरणे 'सह' शब्दः आद्युदात्तः इति प्राञ्चः। तच्चिन्त्यम्। 'सह ते पुत्र सूरिभिः' अस्मिन् प्रयोगे 'सह' इत्यस्य 'एवमादीनामन्तः' इत्यनेन अन्तोदात्तो भवति। यद्यपि षष्ठस्य तृतीये 'सहस्य सः'[६१] इति प्रकरणे सहशब्दः आद्युदात्तः इति प्राञ्चः। अत एव अन्तोदात्तत्वम् इति चिन्त्यम्।

८३. **वाचादीनामुभावुदात्तौ**। 'वाचा' आदिर्येषाम्, तेषाम्, वाचादीनाम्, बहुव्रीहिसमासः। वाचादिशब्दानाम् उभौ उदात्तौ भवतः। अत्र 'उभौ' इति पदग्रहणात् 'अनुदात्तं पदमेकवर्जम्' इति परिभाषाया अप्रवृत्तिर्भवति।

८४. **चादयोऽनुदात्ताः**। निपाताः इति वर्तते। चः आदिर्येषाम्, ते, चादयः बहुव्रीहिसमासः। चादयः (निपाताः) अनुदात्ताः भवन्ति। तेन 'पशुर्नेति' इत्यत्र 'न' इत्यस्य निपाताभावात् वर्तमानसूत्रस्य प्रवृत्तिर्न भवति। अत एव 'निपाताः आद्युदाताः'[६२] इति फिट्सूत्रविहितस्य आद्युदात्तस्य अपवादोऽयम्।

८५. **यथेति पादान्ते**। पादस्य अन्तः, तस्मिन्, पादान्ते, षष्ठीतत्पुरुषसमासः। 'चादयोऽनुदात्ताः'[६३] इति फिट्सूत्रात् 'अनुदात्ताः' इत्यस्य अनुवृत्तिर्भवति। पादान्ते स्थितस्य यथाशब्दस्य अनुदात्तो भवति। यथा – तन्नेमिमृभवो यथा। अस्मिन् प्रयोगे 'यथा' शब्दस्य पादान्ते स्थितत्वात् 'यथेति पादान्ते'[६४] इति वर्तमानफिट्सूत्रेण अनुदात्तत्वं भवति। 'शाकिनं वचो यथा' इत्यादौ छान्दसत्वाद् न अनुदात्तः।

८६. **प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः**। प्रकारादिद्विरुक्तौ अर्थात् 'प्रकारे गुणवचनस्य' इत्यादिसूत्रविहितस्य द्विरुक्तस्य परभागस्य अन्तः उदात्तो भवति। यथा - पटुपटुः। अत्र 'प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः'[६५] इति वर्तमानफिट्सूत्रेणान्तोदात्तत्वं भवति। 'कर्मधारयवदुत्तरेषु'[६६] इति सूत्रेण 'कर्मधारयवद्भावादेव 'समासस्य'[६७] इत्यनेन अन्तोदात्तत्वे सिद्धे व्यर्थमिदं सूत्रम् इति न च वाच्यम्, तस्य पाणिनीयात् पूर्वप्रवृत्तत्वेनादोषात्।

८७. **शेषं सर्वमनुदात्तम्**। शेषम् = नित्यादिद्विरुक्तस्य परम्। नित्याद्यर्थे द्वित्वे सति सर्वम् अनुदात्तं भवति। यथा - प्रप्रायम्। दिवेदिवे। प्रप्रायम् इत्यत्र 'शेषं सर्वमनुदात्तम्' इति वर्तमानफिट्सूत्रेण द्विरुक्तस्य परमनुदात्तं भवति। 'दिवेदिवे' इत्यत्र 'शेषं सर्वमनुदात्तम्'[६८] इति वर्तमानफिट्सूत्रेण द्विरुक्तस्य परमनुदात्तं भवति।

**संकेतपञ्जिः**

पा. सू. = पाणिनीयसूत्रम्

फि. सू. = फिट्सूत्रम्

उ. सू. = उणादिसूत्रम्

वा. = वार्त्तिकम्

सम्पा. = सम्पादकः

**उल्लेखपञ्जिः**

1. पा. सू. ३।१।३
2. फि. सू. ३।६६

3. तदेव ३।५७
4. तदेव २।४२
5. तदेव ३।५२
6. तदेव २।४२
7. तदेव २।२९
8. तदेव २।५७
9. तदेव ३।५०
10. तदेव ३।५१
11. तदेव ३।५०
12. तदेव ३।५१
13. तदेव ३।५५
14. पा. सू. ६।२।१८९
15. तदेव ६।२।१९२
16. फि. सू. २।४२
17. उ. सू. ४२३
18. पा. सू. ६।२।२
19. तदेव ६।१।२२३
20. तदेव ३।५६
21. तदेव ३।५०
22. तदेव ३।५७
23. तदेव ३।५०
24. तदेव ३।५७
25. तदेव १।१
26. तदेव ३।६२
27. तदेव १।१
28. तदेव ३।६२
29. तदेव ३।५०
30. तत्रैव
31. फि. सू. ३।६०
32. पा. सू. ६।१।६३
33. तदेव ६।२।३२

34. फि. सू. १।१
35. तदेव ३।६६
36. तदेव २।४६
37. तदेव २।४२
38. तदेव ३।६६
39. तदेव १।१
40. पा. सू. ६।२।१४०
41. तदेव ६।१।१५८
42. फि. सू. १।१
43. तदेव ४।६९
44. पा. सू. ६।२।१३९
45. फि. सू. १।१
46. तदेव ४।६९
47. तत्रैव
48. तत्रैव
49. फि. सू. ४।७४
50. तत्रैव
51. पा. सू. ६।१।११३
52. फि. सू. ४।७४
53. तदेव ४।७६
54. पा. सू. १।२।२९
55. फि. सू. ४।७६
56. पा. सू. ३।१।३
57. तदेव १।४।५६
58. तदेव १।४।९७
59. फि. सू. ४।८०
60. वा. १००९
61. पा. सू. ६।३।७८
62. फि. सू. ४।८०
63. तदेव ४।८४
64. तदेव ४।८५

65. *तदेव* ४।८६

66. पा. सू. ८।१।११

67. *तदेव* ६।१।१२३

68. फि. सू. ४।८७

**परिशीलितग्रन्थपञ्जिः**


अशोकचन्द्रगौढशास्त्री। *संस्कृतव्याकरणेतिहासविमर्शः*। वाराणसी: भारतीय विद्या संस्थानम्, १९९७।

तारानाथतर्कवाचस्पतिः। *वाचस्पत्यम्*। नइ दिल्ली: राष्ट्रिय-संस्कृत-संस्थानम्, २००६।

धर्मपाल, गौरी। वेदेर *भाषा ओ* छन्द। कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, १९९९।

नागेशभट्टः। *लघुशब्देन्दुशेखरः*। सम्पा. नरहरिशास्त्री पेण्डसे। वाराणसी, २००१ (तृतीयसंस्करणम्)।

पतञ्जलिः। *महाभाष्यम्* (चतुर्थः भागः)। सम्पा. श्रीभार्गवशास्त्री भिकाजी योशी। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।

पाणिनिः। *अष्टाध्यायी*। सम्पा. गोपालदत्तपाण्डेयः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१७। (चौखम्बा सुरभारती ग्रन्थमाला १९)।

____। _____। सम्पा. तपनशङ्कर-भट्टाचार्य्यः। कलकाता: संस्कृत वुक् डिपो, २००५।

भट्टाचार्य्यः, तपनशङ्करः । *वैदिकव्याकरण*। कलकाता: संस्कृत वुक् डिपो, २००२।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतिलाल वनारसी दासः, १९९७ (पुनर्मुद्रणम्) ।

वामन-जयादित्यः। *काशिका*। सम्पा. जयशङ्करलाल त्रिपाठी। वाराणसी: तारा वुक् एजेन्सी, १९९०।

राजाराधाकान्तदेवः। *शब्दकल्पद्रुमः*। नइ दिल्ली: राष्ट्रिय-संस्कृत-संस्थानम्, २००२।

शास्त्री, नारायण ब्रह्मरामशर्माकाङ्करः। *उणादिपदानुक्रमशब्दकोषः*। जयपुर।

सान्याल, अयोध्यानाथ। *वैदिकस्वररहस्यम्*। वर्धमान: वर्धमानविश्वविद्यालयः, १३७५ वङ्गाब्दः।

हरेकान्तमिश्रः। *बृहद्धातुकुसुमाकरः*। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठानम्, २००३।

हालदार, गुरुपद। *व्याकरणदर्शनेर इतिहास*। कलकाता: कालीघाट, १३५० वङ्गाब्दः।